Digitization by eGangotri-South Center

तृतीयः पाठः

साक्षा	पिबति	तक्रम्
नवनीतम्	वत्सः	लांगूलम्

एषा धेनुः। सा महिषी। धेनुः महिषी च समाने भवतः। किं जानासि अनयोः भेदम्? धेनोः कण्ठे साक्षा अस्ति। महिष्याः गळे साक्षा नास्ति। अयं एव मुख्यः भेदः।

धेनोः द्वे शृङ्गे द्वौ कर्णौ द्वे नेत्रे च स्तः। अस्याः चत्वारः पादाः सन्ति; एकं लांगूलं च अस्ति। तथैव महिष्याः अपि चत्वारः पादाः द्वौ कर्णौ द्वे नेत्रे द्वे शृङ्गे एकं लांगूलं च सन्ति। धेनुः प्रतिदिनं वत्साय क्षीरं ददाति

धेनोः क्षीरं मधुरं भवति। धेनोः क्षीरेण शिशून् पोषयन्ति। महिष्याः क्षीरं शिशूनां पथ्यं न भवति। महिष्याः दुग्धं कापिकापानीये अतीव उपयुज्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अम्लेन सिक्तं दुग्धं दधि भवति । दधि मथित्वा घृतं साधयन्ति । घृतेन श्रोत्रियाः यागान् कुर्वन्ति । महिष्याः क्षीरे घृतं अधिकं भवति । घृतं आहारे उपयुज्यते । घृतपक्वाः अपूपाः स्वादुतराः भवन्ति ।

पाठ्यम् – धेनोः पदानि चत्वारि द्वौ कर्णौ द्वे च चक्षुषी ।
लांगूलमेकं द्वे शृङ्गे न स्तो वत्सस्य शृङ्गके ॥

प्रश्नाः – धेनोः क्षीरं कीदृशं भवति ? महिष्याः पादाः कति ? वत्सस्य नेत्राणि कति ? धेनोः कर्णाः कति ? कति लांगूलानि वत्सस्य ? दधि कथं भवति ? तक्रम् नाम किम् ? घृतेन किं प्रयोजनम् ? धेनोः महिष्याश्च को भेदः ?

पर्यायपदानि – धेनुः - गौः, क्षीरं – दुग्धं, पादाः – पदानि, नेत्रं – चक्षुः, अयं – एषः, इयं – एषा, इदं – एतत् ।

योग्यमक्षरं लिख –

अहं दुग्धं पिबा — । त्वं क्षीरं पिब — । स गोपालः क्षीरं पिब — । उपाध्यायाः जलं पिब — । धेनुः वत्साय क्षीरं ददा — । अपूपाः स्वादुतराः भव — । धेनोः द्वे शृङ्गे — । धेनुः महिषी च समाने भव — ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्थः पाठः

क्रीडनम्

अस्माकम् उत्पतति आह्वयति हसति

यतमानः विपक्षाः लज्जन्ते क्रीडांगणम्



इदं अस्माकं क्रीडांगणम्। मम सहपाठकाः सर्वे अपि खेलन्ति अत्र प्रतिदिनम्। अहं अपि अत्र आगच्छामि। अत्र केचित् कन्दुकेन क्रीडन्ति केचन वक्रदण्डैः खेलन्ति। अन्ये च धावन्ति अपरे उत्पतन्ति च। मम सहपाठकः मां आह्वयति। अहं अपि तत्र गत्वा तैः सह क्रीडामि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अहं कन्दुकक्रीडां न जानामि। मम धावने उत्पतने च अधिकं नैपुण्यं वर्तते। तस्मात् धावतां संघे प्रविशामि।

अहो! मां ग्रहीतुं यतमानः कश्चित् मां अनुधावति। कथमपि मां तस्माद्रक्षामि। अहं दूरं आगतवान्। सः दूरे एव स्थितवान्। तस्मात् मम भयं नास्ति। इदानीं अहं तं ग्रहीतुं यत्नं करोमि। अयं मया गृहीतः। अहं तं गृहीतवान्।

मम पक्षे स्थिताः सर्वे हसन्ति। विपक्षाः लज्जन्ते। जिताः। वयं विजयवन्तः। सायङ्कालः भवति। अतः गृहं गच्छामः।

पाठ्यम् — धावन्ति तिष्ठन्ति तथोत्पतन्ति
तं कन्दुकं चांघ्रिभिरुत्क्षिपन्ति।
अन्ये च खेलन्ति पतन्ति भूमौ
हसन्ति पश्यन्ति पुनर्यतन्ते॥

प्रश्नाः — क्रीडांगणे तव सहपाठकाः किं कुर्वन्ति? अन्ये किं कुर्वन्ति? अपरे किं कुर्वन्ति? तव कस्मिन् नैपुण्यं वर्तते? तव कन्दुकक्रीडायां नैपुण्यं वर्तते वा? त्वं जितः वा? जयवान् वा? तव सहपाठकः जितो वा? कः लज्जते? के हसन्ति? त्वं किमर्थं यत्नं करोषि?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विरुद्धपदानि – आगच्छति × गच्छति, विपक्षः × सपक्षः, पतति × उत्पतति, धावति × तिष्ठति, मधुरं × कटु, पुण्यं × पापं, उष्णं × शीतम् ।

योग्यमक्षरं निक्षिपत – त्वं कन्दुकेन क्रीड — । मम सहपाठकाः कन्दुकेन क्रीड — । अहं क्रीडने प्रविश — । रामः गृहं आगच्छ — । त्वं गृहं आ।च्छ — । गोपालः क्रीडांगणं गच्छ — ।

सन्धिः – कथं + अपि = कथमपि । इदं + अस्माकं = इदमस्माकं । मां + आह्वयति = मामाह्वयति । तस्मात् + रक्षामि = तस्माद्रक्षामि ।

*द् + अ = द । म् + आ = मा । क् + इ = कि ।

पर्यायपदानि –

मम – मे । खेलन्ति – क्रीडन्ति । अन्ये – इतरे । भयं – भीतिः । विपक्षाः – प्रतिपक्षाः । नास्ति – न वर्तते । अपरे – अन्ये ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चमः पाठः

पर्वतः

व्याघ्रः सारमेयः हरिणः व्याधः हन्ति भ्रमन्ति
अटन्ति पाषाणाः उपयुज्यन्ते इतस्ततः रोहन्ति मृगया



अयं पर्वतः । अस्मिन् पर्वते बहवः वृक्षाः सन्ति । बहवः पाषाणाः सन्ति । केचित् पाषाणाः अल्पाः, केचित् महान्तः । पाषाणानां पार्श्वभागे अपि वृक्षाः रोहन्ति । वृक्षाः केचित् ह्रस्वाः, केचिदुन्नताः वर्तन्ते । वृक्षेषु केचित् गृहनिर्माणाय उपयुज्यन्ते । केचित् कृषिसाधनेभ्यः उपयुक्ताः भवन्ति । सर्वे वृक्षाः आहारादिपाकाय उपयुज्यन्ते । केषांचन वृक्षाणां फलानि मधुराणि; केषांचन फलानि अम्लानि; कतिपयेषां तिक्तानि कषायाणि च भवन्ति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्मिन् पर्वते गुहाः विद्यन्ते । तासु गुहासु सिंहाः, व्याघ्राः, भल्लूकाः च दिवा वसन्ति । रात्रौ ते क्रूरमृगाः बहिः आगच्छन्ति, इतस्ततः चरन्ति, भक्षयन्ति च क्षुद्रान् मृगान् । अस्मिन् गिरौ हरिणः तिष्ठति । हरिणाः नानाविधाः । व्याधाः सारमेयसाहाय्येन हरिणान् गृह्णन्ति । हरिणाः सौम्याः जन्तवः । पुरा महर्षयः आश्रमेषु हरिणान् रक्षन्ति स्म ।

पाठ्यम् – सिंहो व्याघ्रश्च हरिणो भल्लूको वानरस्तथा ।
खड्गो वृकश्चित्रकायः गजश्चारण्यवासिनः ॥

प्रश्नाः – सिंहादयः कुत्र निवसन्ति ? अरण्ये के के मृगाः निवसन्ति ? तेषु क्रूरमृगाः के ? तेषु सौम्यः मृगः कः ? ग्राममृगाः के ? सारमेयः कीदृशः मृगः ? सिंहादयः कथमरण्ये जीवन्ति ?

पर्यायपदानि – यतन्ते – यत्नं कुर्वन्ति, उपयुज्यन्ते – उपायुक्ताः भवन्ति, जीवन्ति – जीवनं कुर्वन्ति, व्याधाः – मृग-हिंसकाः, सारमेयः – शुनकः, विद्यन्ते – सन्ति, गुहा – बिलम्, हरिणः – सारङ्गः, पर्वतः – गिरिः ।

शून्यस्थलं योग्यपदेन पूरयत –

दिवा सिंहाः — निलीनाः तिष्ठन्ति । रात्रौ ते — चरन्ति । सारमेयाः सर्वदा — चरन्ति । मृगेषु हरिणः — जन्तुः । व्याधाः वनेषु — घ्नन्ति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

षष्ठः पाठः

देवस्तुतिः

कालिन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम् ।
वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ॥ १ ॥

वीणापुस्तकहस्तां पितामहस्य प्रियां धवलदेहाम् ।
हंसरूढां देवीं सरस्वतीं नौमि शतकृत्वः ॥ २ ॥

क्षीरसागरसञ्जातां विष्णोः पत्नीं दयामयीम् ।
लक्ष्मीं सदा प्रपद्येऽहं सर्वसम्पत्समृद्धये ॥ ३ ॥

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥ ४ ॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नमामि नारायणपादपङ्कजम्
करोमि नारायणपूजनं सदा ।
वदामि नारायणनाम निर्मलं
स्मरामि नारायणतत्त्वमव्ययम् ॥ ५ ॥

चन्द्राननार्धदेहाय चन्द्रांशुसितमूर्तये ।
चन्द्रार्कानलनेत्राय चन्द्रार्धशिरसे नमः ॥ ६ ॥

श्रीरामचन्द्रः श्रितपारिजातः
समस्तकल्याणगुणाभिरामः ।
सीतामुखाम्भोरुहचञ्चरीको
निरन्तरं मङ्गलमातनोतु ॥ ७ ॥

श्रियःकान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मंगळम् ॥ ८ ॥

प्रश्नाः – प्रथमश्लोके कं वन्दसे ? सरस्वती कीदृशी भवति ? लक्ष्मीः कथंभूता ? गजाननः कीदृशः ? नारायणं कथं सेवसे ?

सन्धिः – मुख + अरविन्दम् – मुखारविन्दम् । गिरि + ईशः – गिरीशः । गुरु + उक्तिः – गुरूक्तिः । पितृ + ऋणम् – पितॄणम् । *(अ + अ – आ; इ + इ – ई; उ + उ – ऊ; ऋ + ऋ – ॠ । सवर्णदीर्घसन्धि)

पर्यायपदानि – अरविन्दं – अम्भोरुहं, पङ्कजम् । करः – हस्तः । नौमि – वन्दे । स्मरामि – चिन्तयामि ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सप्तमः पाठः

इक्षुः

कटाहः	अपूपः	कार्मिकः
गुडम्	यन्त्रम्	पर्व



चित्रं पश्य। इदं इक्षुक्षेत्रम्। इक्षुः उन्नततया वर्धते। इक्षुं निपीड्य रसं संपादयन्ति। इक्षुरसः अतीव मधुरः। इक्षुरसं कटाहे निक्षिप्य अग्निना शोषयन्ति। तत् गुडम् भवति। गुडेन कृतः अपूपः पायसं च मधुरे भवतः।

इक्षुं यन्त्रेषु प्रक्षिप्य शर्करां कुर्वन्ति। शर्करायाः वर्णः श्वेतः। गुडस्य वर्णः रक्तः। शर्करया क्रियमाणानि भक्ष्याणि अतीव मधुराणि भवन्ति। अस्मद्देशे बहवः शर्करालयाः सन्ति। शर्करालयेषु सहस्राधिकाः कार्मिकाः कर्म कुर्वन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इक्षौ बहूनि पर्काणि सन्ति । वंशः अपि क्षुः इव उन्नततया वर्धते । तस्यापि पर्वाणि सन्ति । वंशः गृहनिर्माणाय उपयुज्यते । वंशः कठिनः । इक्षुः मृदुः । बालाः इक्षुं दन्तैः दष्ट्वा रसं पिबन्ति । अहं इक्षुं भक्षयामि ।

पाठ्यम् – भारतं चेक्षुदण्डं च शुक्लपक्षं च वर्णय ।
अत्र दोषकरब्रूते सारं पर्वणि पर्वणि ॥

प्रश्नाः – इक्षुः कथं वर्धते ? इक्षुरसः कीदृशः ? गुडेन किं कुर्वन्ति ? गुड़स्य वर्णः कः ? शर्करायाः वर्णः कः ? शर्करां कथम् कुर्वन्ति ? वंशस्य पर्वाणि सन्ति वा ? वंशः कस्मै उपयुज्यते ? गुडस्य शर्करायाश्च वर्णः कः ?

शून्यभागं पूरयत – इक्षुरसः — मधुरः । इक्षौ— पर्वाणि वर्तन्ते ?
गुडस्य — रक्तः ।

पर्यायपदानि – अतीव–अत्यन्तम् । बहवः–अनेके । वंशः–वेणुः ।

पदानि संयोज्य वाक्यं रचयत –

(१) वंशः	(४) अपि	(७) निपीड्य
(२) इक्षुः	(५) उन्नततया	(८) रसं
(३) इव	(६) वर्धते	(९) इक्षुम्
	(१०) सम्पादयन्ति ।	

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अष्टमः पाठः

काकः जम्बुकश्च

बुभुक्षितः	अपूपः	आहूय	स्तुतवान्
आपूपिकः	कियत्	श्रावय	झटिति



कश्चित् काकः बुभुक्षितः इतस्ततः भ्रमति स्म। तदा कश्चित् आपूपिकः अपूपभाण्डं शिरसि निक्षिप्य "अपूपः, अपूपः" इति विक्रीणाति स्म। तं वञ्चयित्वा काकः आकाशमार्गेण एकं अपूपं अपाहरत्, पलायित्वा च वृक्षस्य शाखायामुपाविशत्। अचिन्तयच्च "अहो! मया महत् भाग्यं प्राप्तम्" इति।

तदैव कश्चित् जम्बुकः तस्य वृक्षस्य छायां प्राप्तवान्। सोऽपि अतीव बुभुक्षितः आसीत्। सः दैवं निन्दितुं यदा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आकाशं अपश्यत् तदा काकस्य मुखे अपूपमपश्यत् । तत् दृष्ट्वा सः अचिन्तयत् "अहो ! काकेन कियत् पुण्यं कृतम् ! अयं अपूपं सम्पादितवान् किल ! भवतु । उपायेन एनं अपूपं अपहरामि" इति ।

ततः सः काकं आहूय "मित्र ! चिरात् त्वां पश्यामि । तव कुशलं वा ? त्वं अतीव सुन्दरः । तव शरीरमिव तव स्वरः अपि अतीव मधुरः । तव गीतं श्रुत्वा महान् कालः आसीत् । अतः किंचिद् तव गानं श्रावय" इति स्तुतवान् । एवं बहुधा स्तुतः काकः यदा गानं कर्तुं मुखं उद्घाटितवान् तदैव मुखस्थः अपूपः जम्बुकस्य पुरतः अपतत् । वञ्चकः जम्बुकः झटिति तमादाय भक्षयित्वा धावितवान् ।

अतः वञ्चकः वञ्चकान्तरेण वञ्च्यते ।

पाठ्यम् – मातृवत् परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत् सर्वभूतेषु यः पश्यति स पश्यति ॥

प्रश्नाः – काकः अपूपं कथं संपादितवान् ? जम्बुकः काकं दृष्ट्वा किं अचिन्तयत् ? जम्बुकः काकात् अपूपं कथम् अपहृतवान् ?

क्त्वाप्रत्ययान्तानि अव्ययानि –
वञ्चयित्वा, पलायित्वा, दृष्ट्वा, श्रुत्वा, भक्षयित्वा ।

तुमन्प्रत्ययान्तानि अव्ययानि –
निन्दितुम्, कर्तुम्, भक्षयितुम्, द्रष्टुम्, श्रोतुम् ।



CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नवमः पाठः

अश्वः

शफः	तैलशकटः	मूल्यम्
बहुलाः	उष्ट्रः	लेखवाहकः
	उत्सवयात्रा	



अश्वः ग्राम्यः पशुः। अयं सुन्दरः, विश्वासयुक्तः च भवति। अस्य चत्वारः पादाः, द्वौ कर्णौ, द्वे नेत्रे, एकं लांगूलं च सन्ति। अस्य एकैकस्मिन् पादे एकैक एव शफः विद्यते। धेनोः महिषस्य च एकैकस्मिन् पादे द्वौ द्वौ शफौ स्तः। अतः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

महिषादयः "द्विशफाः" इत्युच्यन्ते। अश्वाः तु एकशफाः। एवमेव गर्दभः उष्ट्रः च एकशफौ भवतः।

अश्वः अतीव वेगेन धावति। अतः अयं तुरगः, तुरंगः इति व्यवहियते। पूर्वकाले धूमशकटाः तैलशकटाश्च नासन्। तदा तुरगाः एव लेखवाहकाः अभवन्। ते एव शीघ्रप्रयाणे उपयुक्ता आसन्।

इदानीमपि ते युद्धे सर्वत्र उपयुज्यन्ते। केषुचित् देशेषु तैः भूमिं कृषन्ति। अस्मद्देशे सर्वत्र अश्वशकटा एव बहुलाः भवन्ति। राजानः धनिका भूस्वामिनः च अश्वान् रक्षन्ति। ते स्वशकटेषु द्वौ वा चतुरः वा अश्वान् योजयन्ति स्म। उत्सवयात्रासमये च सामान्या अपि जनाः शकटे बहूनश्वान् योजयन्ति स्म।

अश्वाः धवलाः, अरुणाः, नीलाः, चित्रवर्णाः च सन्ति। तेषां मूल्यम् शतमारभ्य सहस्रपर्यन्तं भवति। केचिदश्वाः युद्धे स्वपृष्ठमारूढवतः योधस्य प्राणानपि रक्षन्ति। भयङ्करे युद्धे अपि ते भीतिं विहाय संचरन्ति। अतः एव राजानः अश्वान् पूजयन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पाठ्यम् – करोति क्रियते चैव तथा पश्यति दृश्यते ।
हरति ह्रियते तद्वत शृणोति श्रूयतेऽपि च ॥
युंक्ते च युज्यते वक्ति चोच्यते पीयते कथम् ;

उपसर्गयोगात् धातोः अर्थः भिद्यते । यथा –

हरति – अपहरति, संहरति, आहरति, प्रहरति, परिहरति, विहरति, व्यवहरति ।

गच्छति – आगच्छति, अनुगच्छति, संगच्छते ।

चरति – प्रचरति, विचरति, अनुचरति, परिचरति, आचरति, अभिचरति ।

सन्धिः – एक + एकः – एकैकः, जल + ओघः – जलौघः, गुण + औन्नत्यम् – गुणौन्नत्यम्, जन + ऐक्यम्–जनैक्यम् ।

* अ + ए = ऐ; अ + ऐ – ऐ; अ + ओ = औ; अ + औ=औ; वृद्धिसन्धिः ।

तुरगाः + एव – तुरगा एव; शकटाः + एव – शकटा एव; सामान्याः + अपि – सामान्या अपि ।

* स्वरे परे आकारोत्तरविसर्गस्य लोपः ।

एकवचनम्	बहुवचनम्
अश्वः	अश्वाः
शफः	शफाः
शकटः	शकटाः
राजा	राजानः
स्वामी	स्वामिनः
पशुः	पशवः



CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दशमः पाठः

कृषीवलः

कृषिकर्म	लवित्रम्	मुसलम्	व्रीहिः
खलः	शूर्पः	धान्यगुच्छः	उलूखलम्
तण्डुलः	तुषः	घटीयन्त्रम्	हलः



यः कृषिकर्म करोति सः कृषीवलः । कृषीवलः हलेन भूमिं कृषति । जलेन भूमिं सिञ्चति । ततः व्रीहीन् आवपति । व्रीह्यः भूमौ रोहन्ति । क्रमशः सस्यानि वर्धन्ते । सस्यानामुपरिभागे धान्यगुच्छाः संभवन्ति । पक्वान् तान् लवित्रैः आलूय खलं नीत्वा प्रहरन्ति । पृथक्कृतं धान्यं उलूखले निक्षिप्य मुसलेन कुट्टयन्ति । तेन तुषाः विमुच्यन्ते । स्त्रियः शूर्पैः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उत्पवनादिना तण्डुलं शोधयन्ति। तण्डुलं पक्त्वा अन्नं वयं भक्षयामः।

वृषभौ कृषीवलस्य अनेकधा उपकुरुतः। तौ हलं कर्षतः, घटीयन्त्रेण बद्धौ जलं आकर्षतः, शकटे नियुक्तौ धान्यादिकं वहतः। वृषभाः पलालं, बुसं, पिण्याकञ्च भक्षयन्ति।

अयं कृषिप्रधानः देशः। अत्र बहवः जनाः कृषिकर्मणा जीवन्ति। कृषेः अनुकूलाः नदाः, नद्यः, तटाकाः, जलाशयाश्च अस्माकं देशे बहवः सन्ति। जलाशयेषु जलं पूरयित्वा कृषये उपयुञ्जते।

पाठ्यम् – कृषिप्रधाने देशेऽस्मिन् पूजनीयाः कृषीवलाः।
जीवयन्ति हि भूतानि चाहारैस्तण्डुलादिभिः॥

प्रश्नाः – को नाम कृषीवलः? सः सस्योत्पादनाय किं करोति?
स्त्रियः कथम् तण्डुलं शोधयन्ति? कृषीवलोपकारिणः के के?
वृषभा कृषीवलेभ्यः कथमुपकुर्वन्ति? वृषभस्य आहाराः के?

यथायोग्यं पूरयत – जलेन – सिञ्चति। क्षेत्रे क्रमशः सस्यानि – ।
मुसलेन – विमुच्यन्ते। वृषभाः –, —, –, अदन्ति।
धान्यगुच्छान् – आलूय – नीत्वा – । तुषविमुक्तं —
वयं भक्षयामः।

सन्धिः – पिण्याकं + च – पिण्याकञ्च; उप्युं + ज्ञते – उपयुञ्जते;
खलं + नीत्वा – खलन्नीत्वा।

* अनुस्वारस्य पञ्चमवर्णाक्षरयोगे परवर्णपञ्चमो भवति। (अनुसासिकसन्धिः)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकादशः पाठः

माता का ?

गृही	सपत्नी	अभणत्	दीयताम्
रजनी	कारागृहम्	विवदमाना	अशापयत्



एकस्मिन् गृहे कस्यचित् गृहिणः द्वे भार्ये अवर्तेताम्। तयोरुभयोरपि एकैकस्याः एकैकः पुत्रः जायत। कस्याश्चित् रजन्यामेकस्याः कुमारः दैववशात् मृतिमगमत्। तज्जननी मृतं स्वशिशुं सपत्न्याः शयने निधाय तत्तनयं स्वशयने अशाययत्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ततः प्रभाते जीवन्तं शिशुं स्वस्वपुत्रत्वेन विवदमाने ते स्त्रियौ, राज्ञो निकटमगच्छताम्। राजा तयोर्विवादमाकर्ण्य साक्ष्याऽभावात् तत्र कञ्चिदुपायं अचिन्तयत्। सः "एनं शिशुं छित्वा एकैकस्यै एकैकं खण्डं दिशत" इति भृत्यानादिशत्। एतत् श्रुत्वा सपत्नी राजानमभणत्-"आवयोरुभयोरपि पुत्रो माऽस्तु, यथाऽऽज्ञप्तं क्रियता" मिति। अन्या तु सभयं कम्पमाना, पुत्रमृतिमसहमाना राजानमवदत्-"हे देव! पुत्रस्तस्यै एव दीयताम्। यथाकथञ्चिदपि पुत्रो जीवतु, मा हन्यता" मिति। एतत् आकर्ण्य राजा शिशुवधमसहमानामेव तज्जननीं विज्ञाय तस्याः हस्ते पुत्रं दातुमाज्ञाप्य अन्यां कारागृहं प्रापयत्।

पाठ्यम् – पिता माता पितृव्यश्च मातुलश्च पितामहः।
मातामहश्च श्वश्रूश्च श्वशुरः श्यालदेवरौ।
पितृष्वसा तथा मातृष्वसा चैव स्वबान्धवाः॥

प्रश्नाः – सपत्नी रात्रौ किमकरोत्? राजा कं उपायमचिन्तयत्? तदा सपत्नी किमभणत्? माता किमभणत्? राजा किमकरोत्।

सन्धिः – तयोः+विवादं-तयोर्विवादं; आवयोः+उभयोः+अपि-आवयोरुभयोरपि।

* अकारभिन्नः स्वरः + :– मृदुहला अचा वा योगे र् (रेफः) भवति।
राज्ञः + निकटम् - राज्ञो निकटम्; पुत्रः+मास्तु – पुत्रो मास्तु; पुत्रः जीवतु – पुत्रो जीवतु।

* अ + : – मृदुहला योगे ओकारो भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वादशः पाठः

कालियदमनम्

ह्रदः	कदम्बवृक्षः	जगाम
फणा	म्रियन्ते	दमनम्
मृतप्रायः	आरेमे नदी	नदः

पुरा द्वापरयुगे भगवान् श्रीकृष्णरूपेण नन्दगोपगृहे निवसति स्म। तदा यमुनासमीपवर्तिनि ह्रदे कालियो नाम

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कश्चित् क्रूरः सर्पः आसीत् । सः परिवारसहितः प्रतिदिनं स्वविषं जले वमति स्म । तेन सर्वमपि हृदजलं विषजलमिवाभवत् । तज्जलं ये पिबन्ति ते तदैव म्रियन्ते स्म । अतः कोऽपि तस्य हृदस्य समीपमपि न गच्छति स्म ।

कदाचित् गोपबालकैः क्रीडन् कृष्णः तस्य हृदस्य तीरं प्राप । अगाधजलसन्दर्शनेन प्रमुदितमनाः कृष्णः जलसमीपं यदा गतवान् तदा मित्रैः "विषमयमिदं जल" मिति निवारितः । तत्र कालियो नाम सर्पो वसन्तिष्ठतीति मित्रमुखात् श्रुत्वा जातकोपः कृष्णः कदम्बवृक्षमारुह्य जले निपपात । कालियोऽपि तं शब्दं निशम्य क्रुद्धो यावत् बहिरागत्य ददर्श तावत् कृष्णः तस्य फणासु पादेन ताडयामास । तेन प्रहतः कालियः किञ्चिन्मूर्छितोऽपि कृष्णं स्वकायेन बबन्ध । तदा कृष्णो युक्त्या तद्बन्धनं विमुच्य क्षणात्तस्य फणोपरि आरुह्य नर्तितुमारेभे । तेन कालियः मृतप्रायोऽभवत् । तद्विदित्वा तत्पत्न्यः श्रीकृष्णसमीपमागत्य स्वभर्तुः प्राणभिक्षां प्रार्थयन्त । दयानिधिः कृष्णोऽपि "इमं हदं विहाय गच्छत" इत्युक्त्वा तं विससर्ज । चिरात् लब्धसंज्ञः कालियः बन्धुपरिवारसहितः हदं त्यक्त्वा समुद्रं प्रति प्रययौ । मित्रैः देवैश्च बहुधा स्तुतः श्रीकृष्णः गोपालबालकैः सह गोकुलं जगाम ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पाठयम् – वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥

उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।
पयःपानं भुजङ्गानां केवलं विषवर्धनम् ॥

प्रश्नाः – कालियः कुल आसीत् ? तेन कृतः अपकारः कः ? सः केन दण्डितः ? कृष्णः तं कुतः विससर्ज ? सः कुत्र जगाम ? कालियस्य पत्न्यः श्रीकृष्णं किं प्रार्थयन्त ?

वाक्येषु योजयत – यदा-तदा; यावत्– तावत; चिरात; बहुधा ।

अर्थः – निवसति स्म-न्यवसत्; ददर्श-अपश्यत; आसीत् – अभवत; प्राप–प्रापत्–अगच्छत; निपपात-न्यपतत; ताडयामास – अताडयत ; बबन्ध – अबध्नात् ; आरेभे – आरभत; विससर्ज – व्यसृजत ; प्रययौ – प्रायात् – अगच्छत; जगाम – अगच्छत ।

(अत्र पाठे ह्वयः क्रिया पुराणभूतकाले उपयुक्ताः)

सन्धिः – तत + विदित्वा – तद्विदित्वा; यावत + बहिः - यावद्बहिः; वाक् + बलं - वाग्बलम् ।

★ पदान्तानां अनुनासिकेतरवर्गहलां स्ववर्गतृतीयो भवति अचा मृदुहला वा योगे ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्रयोदशः पाठः

तिथयः

गोविन्दः – सखे! श्रीरङ्ग, कुत्र गच्छसि?

श्रीरङ्गः – अद्य एकादशी किल? स्नात्वा देवालयं गच्छामि।

गो – एकादशी नाम का?

श्री – एकादशी काचित् तिथिः।

गो – तिथिर्नाम का?

श्री – वर्षस्य द्वादशमासाः खलु?

गो – आम्, द्वादशमासाः।

श्री – प्रतिमासं द्वौ पक्षौ किल?

गो – कौ तौ पक्षौ?

श्री – शुक्लपक्षः कृष्णपक्षश्च।

गो – तथा वा!

श्री – प्रतिपक्षं पञ्चदश तिथयः सन्ति।

गो – काः ताः तिथयः?

श्री – प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्दशी, पूर्णिमा।

गो – तिष्ठ तिष्ठ। अन्ते "पञ्चदशी" इति कुतः न वदसि?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

श्री – तद्वा ! शुक्लपक्षः, कृष्णपक्षः इति द्वौ पक्षौ किल ? तत्र शुक्लपक्षस्य अन्तिमा तिथिः "पूर्णिमा" इति, कृष्णपक्षस्य अन्तिमा तिथिः "अमावास्या" इति च उच्यते ।

गो – अरे ! पूर्णिमा इति नाम कुतः ? काणिमा इति कुतो नास्ति ?

श्री – अरे वक्र ? पूर्णिमायां चन्द्रः पूर्णः भवति । अतः 'पूर्णिमा' इति तस्याः नाम भवति । अमायां चन्द्रः न शोभते । अतः "अमा" इति "अमावास्या" इति च वदन्ति ।

गो – तथा वा ! अस्तु । त्वं एकादश्यामेव कुतः देवालयं गच्छसि ?

श्री – एकादशी विष्णुतिथिः । तस्यां उपवासं कृत्वा यः भगवन्तं नमति सः सुखी भवति, पुण्यं च लभते ।

गो – एवं वा ! तथा चेत् अहमपि आगच्छामि । उभावपि देवालयं गच्छावः ।

(उभौ भजनं कुरुतः)

हरे राम हरे राम राम राम हरे हरे ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥

प्रश्नः – त्वं एकादश्यामेव कुतः देवालयं गच्छसि ?

सन्धिः – कृष्णपक्षः + च–कृष्णपक्षश्च; ताः + तिथयः–तास्तिथयः; खगः + टिट्टिभः – खगष्टिट्टिभः ।

* विसर्गः चछाभ्यां योगे 'श' भवति; तथाभ्यां योगे सकारो भवति; टठाभ्यां योगे षकारो भवति ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ल्यप्प्रत्ययान्तानि अव्ययानि –

आ + नीत्वा - आनीय; आ + गत्वा - आगत्य; आ + रूढ्वा – आरुह्य; नि + शमित्वा – निशम्य ।

* उपसर्गयोगे धातोः क्त्वाप्रत्ययस्थाने ल्यप्प्रत्ययो भवति ।

चतुर्दशः पाठः

भरतः

पुरा दुष्यन्त इति क्श्चित् राजा बभूव । सः कदाचित् मृगयार्थं वनं जगाम । मृगयापरिश्रान्तः सः कण्वमहर्षेः आश्रमं ययौ । तत्र शकुन्तलां नाम कन्यां चकमे । तां स गन्धर्वविधिना उपयेमे । किंचित्कालानन्तरं तां त्यक्त्वा स नगरम् प्राप ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राजभोगलालितः दुष्यन्तः शकुन्तलां विसस्मार। चिरात् भर्ता नागतवानिति शकुन्तला ऋषिकुमारैः सह दुष्यन्तसभामाप। दुष्यन्तः "त्वं न मया परिणीते" ति गर्भिणीं तां तिरश्चकार।

सा मारीचमहर्षेः आश्रमे उवास; दशमे मासे चक्रवर्ति-लक्षणोपेतं कुमारं सुषुवे। महर्षिः "सर्वदमन" इति तस्य नाम चकार। स बाल्ये सिंहशिशुभिः चिक्रीड। सः धर्मेण राज्यं बभार। अतः "भरत" इति नाम भेजे। तस्मिन् राज्यं पालयति सति प्रजाः सुखेन ववृतिरे। तेन सुरक्षितत्वात् अयं देशः भारत-देशः, भरतवर्षः, भरतखण्डः इति च अद्यापि व्यवहियते।

पाठ्यम् – गच्छति पुरश्शरीरं धावति पश्यदसंस्तुतं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥

प्रश्नाः – भरतः कस्य पुत्रः? तस्य मातुः नाम किम्? भारतदेश इति नाम कस्य कुतः अभूत्?

अव्ययानि – तत्र, अत्र, इति, च, चिरात्, सह, एव।

अर्थाः – बभूव - अभवत्; जगाम - अगच्छत्; ययौ-अयात्; चकमे–अकामयत, उपयेमे–उपायमत–उदवहत्; प्राप–प्राप्त; विसस्मार–व्यस्मरत्; चकार – अकरोत्; उवास – अवसत्; सुषुवे – असूत; भेजे – अभजत; बभार – अभरत–अवहत्; ववृते–अवर्तत–आसीत्; असंस्तुतं–अतृप्तम्; चेतः–मनः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चदशः पाठः

पत्रलेखनम्

मद्रास्,
ति २०—८—१९५६.

श्रीमते
रमाकान्ताय,
हनुमान् घट्टः, काशी।

प्रिय रमाकान्त,

अत्र सर्वे वयं दैवकृपया कुशलिनः। तत्र बन्धुवर्गसहितस्य तव कुशलं पदे पदे प्रतीक्षे।

अहमिदानीं "परिचय" परीक्षार्थं पठामि। परीक्षा सन्निहिता वर्तते। संस्कृतभाषाप्रचारिण्या सभया प्रचाल्यमानाः परीक्षाः परिचयः, अभिज्ञः, विचक्षणः, समर्थः, कोविदः इति पञ्च सन्ति। क्रमशः ताः सर्वा अपि परीक्षाः दातुं प्रयतिष्ये। यद्यपि अहं आंग्लपाठशालायां पठामि तथापि अवकाशे संस्कृतमपि पठन् अस्मि।

संस्कृतभाषा अतीव मधुरा। त्वमपि संस्कृतं पठित्वा परीक्षां देहि। तव प्रत्युत्तरं प्रतीक्षे।

त्वन्मित्रम्,
रामकृष्णः.

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

षोडशः पाठः

दिशः

पिता – मधुसूदन, अद्य पाठशालायां किमपठः ?

मधुसूदनः – पितः, अद्य ममोपाध्यायः दिशः उद्दिश्य अबोधयत् ।

पिता – यदबोधयत् तत् स्मरसि वा ?

मधु – बाढम् । स्मरामि ।

पिता – तथा चेत् दिशां ज्ञानोपायं विशदय ।

मधु – अहं सूर्योदयकाले सूर्याभिमुखं तिष्ठामि । बाहू प्रसारयामि । तदा ममाग्रे विद्यमाना दिक् प्राची । पश्चाद्भागे विद्यमाना दिक् प्रतीची । मम दक्षिणबाहुः दक्षिणां दिशं सूचयति । वामबाहुश्चोत्तरां दिशं सूचयति ।

पिता – साधु, त्वदुक्तं साधु । तवोपाध्यायः दिशां ज्ञानाय समीचीनमुपायमबोधयत् ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

– तर्हि भोः पितः, सूर्यः सर्वदा प्राच्यामेव दिशि उदेति। चन्द्रस्तु कदाचित् प्राच्यां, कदाचित् पश्चिमायामुदेति। तत्र किं कारणम् ?

पिता – वत्स, चन्द्रः अपि सदा प्राच्यां दिश्येव उदेति। तथापि सः मध्याह्ने सूर्यस्य कान्त्या तिरस्कृतः आकाशे न दृश्यते। यदा सूर्यः अस्तं गच्छति तदा सः प्रकाशते। सूर्यास्तसमयसमये चन्द्रः यत्र विद्यते तत्रैव शोभते।

मधु – पितः, पूर्णिमायामेव कुतः चन्द्रः पूर्णः भवति ?

पिता – पूर्णिमादिने सूर्यास्तसमयसमये चन्द्रः प्राच्यां दिशि उदेति। तदा सूर्यस्य सर्वे किरणाः चन्द्रबिम्बे दर्पण इव पूर्णतया पतन्ति। अतः चन्द्रः पूर्णतया प्रकाशते।

मधु – प्रतिदिनं सूर्यकिरणाः सर्वेऽपि चन्द्रे न पतन्ति किम् ?

पिता – न। भूमिः सूर्यं परितः भ्रमति; चन्द्रश्च भूमिं परितः। एवं भ्रमणे भूम्याः व्यवधानात् सर्वे सूर्यकिरणाः चन्द्रोपरि एकदैव न पतन्ति। अपि तु क्रमेण अधिकतया स्वल्पतया च पतन्ति। यदा किरणानां पतनं वर्धते तदा शुक्लपक्ष इति, यदा क्षीयते तदा कृष्णपक्ष इति च उच्यते।

मधु – अपूर्वोऽयं विषयः मया ज्ञातः। मम सहपाठकाय रामचन्द्राय श्वः कथयिष्यामि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पाठ्यम् – सप्तविंशति ताराश्च तथा द्वादश राशयः ।
नव ग्रहाः नभोमार्गे भ्रमन्ति सततं स्वयम् ॥

प्रश्नः – पूर्णिमायामेव कुतः चन्द्रः पूर्णः भवति ?

अव्ययानि – पदे पदे, इदानीं, अद्य, अतीव, सर्वदा ।

वाक्येषु योजयत – बाढम्, साधु, एकदैव, क्रमेण ।

सप्तदशः पाठः

भारतकथा

हस्तिनापुरे धृतराष्ट्रः, पाण्डुः इति च द्वौ भ्रातरौ आस्ताम् । तयोः ज्येष्ठः धृतराष्ट्रः अन्धः । कनिष्ठः पाण्डुः पाण्डुरोगी । धृतराष्ट्रस्य शतं पुत्राः । तेषु दुर्योधनः दुःशासनश्च मुख्यौ ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पाण्डोः धर्मपुत्रः, भीमः, अर्जुनः, नकुलः, सहदेवश्चेति पञ्च पुत्राः आसन् ।

दुर्योधनादयः दुष्टाः । धर्मपुत्रादयः साधवः । पाण्डुः ऋषिशापेन दिवं प्राप । धृतराष्ट्रः पाण्डवेभ्यः अर्धराज्यं ददौ । ते स्वराज्यं धर्मेण पालयामासुः । प्रजाः पाण्डवेषु अनुरक्ताः आसन् ।

तदसहमानः दुर्योधनः पाण्डवेभ्यः राज्यं हर्तुमुपायमचिन्तयत् । धर्मपुत्रः द्यूतक्रीडायां प्रीतिमान् इति ज्ञात्वा तं सः द्यूताय आजुहाव । दुर्योधनस्य मातुलः शकुनिः द्यूतविद्यायामतीव समर्थः । शकुनेः धर्मपुत्रस्य च द्यूतक्रीडा प्रवृत्ता ।

तत्र प्रथमं धर्मपुत्रः राज्यं पणतया न्यक्षिपत् । वञ्चकः शकुनिः तत् अजयत् । ततः धर्मपुत्रः क्रमेण स्वपत्नीं द्रौपदीं पणमकल्पयत् । साऽपि शकुनिना जिता । तदैव दुर्योधनः दुःशासनं आहूय सभायां द्रौपद्याः मानभङ्गं कर्तुमादिदेश । दुःशासनः द्रौपद्याः वस्त्राणि सभायामाचकर्ष । द्रौपद्या सकरुणं प्रार्थितः कृष्णः तस्या वस्त्रं वर्धयित्वा मानं ररक्ष ।

ततः द्वादशवत्सरपर्यन्तं वनवासं, त्रयोदशे वत्सरे अज्ञातवासं च कृत्वा आगच्छत, पश्चात् राज्यं दास्यामि" इत्युक्त्वा दुर्योधनः पाण्डवान् द्रौपदीं च वनाय प्रेषयामास ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पाण्डवाः द्वादशवर्षपर्यन्तं बहूनि कष्टानि सोढ्वा पश्चादेकवर्ष-पर्यन्तं विराटस्य नगरे अज्ञातवासमकुर्वन् ।

त्रयोदशे वर्षे पूर्णे सति पाण्डवाः दुर्योधनं "राज्यं देही" ति प्रार्थयन्त । सः "न दास्यामी" त्युवाच । ततः पाण्डवानां धार्तराष्ट्राणां च महत् युद्धमभवत् । श्रीकृष्णः पाण्डवानां पक्षे आसीत् । अतः पाण्डवाः दुर्योधनादीन् हत्वा राज्यं प्रापुः ।

पाठ्यम् – (१) नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

(२) द्रौपद्याः पाण्डुतनयाः पतिदेवरभावुकाः ।
न देवरो धर्मराजः सहदेवो न भावुकः ॥

(६) यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

प्रश्नाः – धृतराष्ट्रस्य कति पुत्राः ? तेषु मुख्यौ कौ ? पाण्डोः पुत्राः के ? दुर्योधनः पाण्डवेभ्यः राज्यं कथमपजहार ? पुनः राज्य-दानाय दुर्योधनः कं नियमं कल्पितवान् ? पाण्डवानामेव युद्धे कुतः विजयः लब्धः ?

विवरणम् – पाण्डवाः = पाण्डोः पुत्राः, धार्तराष्ट्राः = धृतराष्ट्रस्य पुत्राः, द्रौपदी = द्रुपदस्य अपत्यं स्त्री ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सन्धिः – इति + उक्त्वा = इत्युक्त्वा, इति + उवाच = इत्युवाच, गुरु + आज्ञा=गुर्वाज्ञा, धेनु + अधिपतिः=धेन्वधिपतिः, पितृ + अर्चनं = पित्रर्चनम्, भर्तृ + अनुसरणं = भर्त्रनुसरणम्

*इकारः + असवर्णः अचू - य् भवति, उकारः + असवर्णः अचू-व् भवति, ऋकारः + असवर्णः अचू र् भवति। (यणादेशसन्धिः)

प्रयोगविशेषः –

(१) त्रयोदशे वर्षे पूर्णे सति (त्रयोदशवर्षाणां पूर्त्यनन्तरम्) पाण्डवाः राज्यं प्रार्थयन्त।

(२) रामे वनं गते सति (रामवनगमनानन्तरम्) दशरथः अम्रियत।

(३) जानक्यां आनीतायां सत्यां (जानक्याः आनयनानन्तरम्) लङ्का नाशमभजत।

(४) स्त्रीषु दुष्टासु सतीषु (स्त्रीणां दोषात्) जायते वर्णसङ्करः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अष्टादशः पाठः

बुद्धिमान् बलवान्



अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती। तमवलोक्य सर्वे शृगालाः चिन्तयन्ति स्म – "यद्यप्ययं केनाप्युपायेन म्रियेत तदाऽस्माकमेतद्देहेन मासचतुष्टयस्य भोजनं भविष्यति" इति। तत्रैकेन वृद्धशृगालेन प्रतिज्ञातम् – "मया बुद्धिप्रभावादस्य मरणं साधयितव्यम्" इति।

अनन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा साष्टाङ्गपातं प्रणम्योवाच – "देव, दृष्टिप्रपातं कुरु"। हस्ती ब्रूते-"कस्त्वम्? कुतः समायातः"। सोऽवदत् -- "जम्बुकोऽहम्। सर्वैः वनवासिभिः मिलित्वा भवत्सकाशं प्रस्थापितः यत् विना राज्ञा अवस्थातुं न युक्तम्। तदत्राटवीराज्ये अभिषेक्तुं सर्वस्वामिगुणो-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पैतः भवान् निरूपितः। तत् यावत् लग्नवेला न विचलति; तावत् सत्वरमागम्यतां देवेन" इत्युत्थाय चलितः।

ततोऽसौ राज्यलोभाकृष्टः कर्पूरतिलकः मृगालवर्त्मना धावन् महापङ्के निमग्नः, मृगालैः भक्षितश्च।

"उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः"

(हितोपदेशात्)

प्रश्नाः – शृगालाः किमचिन्तयन्? वृद्धशृगालेन किं प्रतिज्ञातम्? स कथं हस्तिनं वञ्चयति स्म। अनया कथया का नीतिः ज्ञाता?

सन्धिः – यत् + शक्यं = यच्छक्यम्, प्राक् + शिरः = प्राक्छिरः, अप् + शक्तिः = अप्शक्तिः, द्विट् + शस्त्रम् = द्विट्छस्त्रम्; तद् + श्लोकः = तच्छ्लोकः।

* अनुनासिकमिन्नः ऊष्मभिन्नश्च हल् + शू + अचू वा अन्तस्थः वा, अनुनासिकः वा चेत् शवर्णस्य छवर्णः भवति।

प्रयोगविशेषः –

विना राज्ञा अवस्थातुं न युक्तम्।
विना राजानं "
विना राज्ञः "
धनं विना, धनेन विना, धनात् विना जीवनं कष्टम्।
* विना योगे द्वितीया, तृतीया, पञ्चमी वा विभक्तिः प्रयुज्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकोनविंशः पाठः

दिलीपचरितम्



अस्ति सूर्यवंशे दिलीपो नाम राजा । तस्य सुदक्षिणा-नाम्नी अनुरूपा भार्या बभूव । चिरादपि तयोः दम्पत्योः सन्ततिः नाभवत् । तेन खिन्नौ तौ जम्पती स्वकुलगुरोः वसिष्ठस्य आश्रमं प्राप्य तस्मै निवेदयामासतुः ।

महर्षिः योगदृष्ट्या पुत्रविघ्नकारणं ज्ञात्वा राजानमेव-माह -- "राजन् ! पुरा त्वं देवनगरे इन्द्रं संसेव्य प्रतिनिवर्त-मानः मार्गस्थायाः कामधेनोः प्रदक्षिणं न कृतवान् । तेन क्रुद्धा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कामधेनुः "यावत् मम सन्ततिं न पूजयिष्यसि तावत् ते सन्ततिः न भविष्यति" इति शशाप। अतः त्वं तस्याः सुतां नन्दिनीमिमामाराधय। अस्याः अनुग्रहेण तव पुत्रः भविष्यति" इति।

अथ तौ दम्पती तदाज्ञां शिरसा वहन्तौ तदाश्रमस्थां नन्दिनीनाम्नीं धेनुम् तृणदानेन, जलपायनेन, अभिषेकादिभिश्च सम्यक् पूजयामासतुः। तेन भृशं सन्तुष्टा नन्दिनी अमृततुल्यं क्षीरं ताभ्यां ददौ।

अचिरादेव सुदक्षिणा गर्भिणी जाता। पूर्णे नवमे मासे सुदक्षिणा सुकुमारं कुमारं सुषुवे। दिलीपः तस्य "रघुः" इति नाम चकार। तस्यैव वंशः रघुवंश इति प्रसिद्धिं प्राप। "रघुवंश" नामकं काव्यमपि कालिदासेन विरचितम्।

प्रश्नाः – दिलीपस्य कुतः सन्ततिः नाभवत्? वसिष्ठः कमुपायमवोचत्?
नन्दिनी नाम का? दिलीपः नन्दिनीं कथमाराधयत्?
दिलीपस्य पुत्रः कः? कामधेनुः दिलीपं कथमशपत्?

रघुवंशे – तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव॥

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center.

प्रयोगः – कर्तरि प्रयोगः

अहं पाठं पठामि
त्वं पाठं पठसि
सः पाठं पठति
(कर्ता प्रथमाविभक्तौ
कर्म द्वितीयाविभक्तौ)

कर्मणि प्रयोगः

मया पाठः पठ्यते
त्वया पाठः पठ्यते
तेन पाठः पठ्यते
(कर्ता तृतीयाविभक्तौ
कर्म प्रथमविभक्तौ,
क्रियापदं यकारसहितं
आत्मनेपदञ्च भवति)

अमरकोशः – दम्पती जम्पती जायापती भार्यापती च तौ ।

विंशः पाठः

पत्रालयः

सुशीला - सखि कमले, कुत्र वेगेन गच्छसि ?

कमला - पत्रालयं प्रति गच्छामि किल ।

सु - पत्रालये किं करिष्यसि ?

क - पत्रपेटिकायां पत्रं निक्षेप्स्यामि ।

सु - किं तत् पत्रम् ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क - तद्वा, मे भ्राता, दिल्लीनिवासिने स्वमित्राय लिखितवान्। तत् पत्रं पत्रपेटिकायां प्रक्षिपेत्युक्तवान्। तदादाय गच्छामि।

सु - अस्तु। त्वं पत्रपेटिकायां पत्रं प्रक्षिपसि चेत् तत् कथं दिल्लीस्थं ते भ्रातुः मित्रं प्राप्नोति ? न हि अस्माकमिव पत्रस्य पादौ स्तः।

क - अहो! एतदपि न जानासि ?

सु - न जानामि खलु।

क - तर्हि शृणु पत्रपेटिकायां पत्रेषु प्रक्षिप्तेषु सत्सु, नियतसमये पत्रालयभृत्यः तानि पत्राणि पेटिकातः गृह्णाति। पत्रोपरि विद्यमानायाः मूल्यचीटिकाया उपरि तिथिसहितां स्थान-मुद्रामङ्कयति।

सु - ततस्ततः ?

क - ततः समानस्थाननामवन्ति पत्राणि एकीकृत्य, पृथक् पृथक् संचिकासु निक्षिप्य बध्नाति। अनन्तरं पत्रवाहकाः एकैकां संचिकां आदाय तत्तत्स्थानं प्रति धावन्ति। अथवा धूमशकटम् वाष्पशकटम् वा प्रापयन्ति।

सु - अहो! रसवान् खल्वयं विषयः। ततस्ततः ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क - ततः तत्तत्स्थानिकः पत्रालयभृत्यः स्वग्रामनामांकितां संचिकां गृहीत्वा पत्रालयं गच्छति । तत्र पत्राणामुपरि तत्प्राप्तिदिनमुद्रां अङ्कयति ।

सु - ततस्ततः ?

क - ततः पत्रदाता तानि पत्राणि गृहीत्वा तत्तन्नामवते ददाति ।

सु - प्रियसखि, अद्य त्वन्मुखात् अपूर्वं कंचित् विषयमहं ज्ञातवती ।

क - अहो ! त्वया सह भाषमाणया मया महान् कालो नीतः । पश्चादागत्य अन्यानपि विषयान् कथयामि । नमस्ते ।

सु - नमस्ते ।

पाठ्यम् – पत्रालये पत्रपेटयां पत्रं पातितमात्मना ।
तिथिमुद्राङ्कितं धूमशकटे व्यामथानके ॥
नीतं पुनर्मुद्रितञ्च पत्रदात्रा प्रदीयते ।
छन्नलेखः पोटलिका द्रव्यादेशोऽपि तत्समाः ॥

प्रश्नः – पत्रपेटिकायां पत्रं निक्षिपसि चेत् कथं मित्रं प्राप्नोति ?

लिङ्गपरिवर्तनम् – लिखितवान् – लिखितवती, ज्ञातवान् – ज्ञातवती, कृतवान् – कृतवती, उक्तवान् – उक्तवती ।

प्रयोगविशेषः – पेटिकायां पत्रं निक्षिपसि चेत (यदि) कथंमित्रं प्राप्नोति ? पुरुषः विद्यां सम्पादयेत् यदि (चेत्) तर्हि (तदि) पूजनीयो भवेत ।
यदि चेत् – तर्हि तदा – हेतुहेतुमद्भावः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकविंशः पाठः

मुनिः मूषिकश्च



अस्ति गौतमस्य मुनेस्तपोवने महातपा नाम मुनिः । तेन आश्रमसन्निधाने मूषिकशावकः काकमुखाद्भ्रष्टो दृष्टः । तेन दयायुक्तेन सः नीवारकणैः संवर्धितः । तं च मूषिकं खादितुं यत्नादन्विष्यन् बिडालो मुनिना दृष्टः । ततो भीतो मूषिकः मुनिना तपःप्रभावात् बिडालः कृतः । स बिडालः कुक्कुरात् बिभेति स्म । ततोऽसौ कुक्कुरः कृतः । सोऽपि व्याघ्रात् अबिभ्यत् । ततोऽसौ व्याघ्रः कृतः । अथ व्याघ्रमपि तं मुनिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मूषिकनिर्विशेषं पश्यति स्म । अतः सर्वे तत्रत्याः मुनिजनाः तं व्याघ्रं च दृष्ट्वा वदन्ति – "अनेन मुनिना मूषिकोऽयं व्याघ्रतां नीतः" इति ।

एतत् श्रुत्वा व्याघ्रः सव्यथोऽचिन्तयत् –– "यावदयं मुनिः जीविष्यति तावदिदं मम स्वरूपाख्यानमकीर्तिकरं न पलायिष्यते" इति । समालोच्यैवं स मुनिं हन्तुं समुद्यतः । मुनिना तस्य चिकीर्षितं ज्ञात्वा "पुनर्मूषिको भव" इत्युक्त्वा मूषिक एव कृतः ।

"नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति"

(हितोपदेशात्)

प्रश्नाः – मूषिकः मुनिना कुत्र दृष्टः ? मुनिः मूषिकं कुतः व्याघ्रं कृतवान् ? व्याघ्रः किमचिन्तयत् ? सः कथं पुनः मूषिकः अभवत् ? अनया कथया का नीतिः बोध्यते ?

प्रयोगविशेषः – यावत् अयं मुनिः जीविष्यति तावत् इदं न पलायिष्यते । यावत् रामः पर्णशालामागच्छत् तावत् रावणः सीतामपाहरत ।

(यावत् - तावत् - तदन्तरे अथवा तत्पूर्वमेव)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वाविंशः पाठः

बन्धुपरिचयः

पिता – जनकः
पितृव्यः – पितुः भ्राता
पितृष्वसा – पितुः भगिनी
पैतृष्वसेयः – पितृभगिन्याः पुत्रः
पितामहः – पितुः पिता
पितामही – पितुः माता
प्रपितामहः – पितामहस्य पिता
भ्राता – सहोदरः
पुत्रः – सुतः
पौत्रः – पुत्रस्य पुत्रः
दौहित्रः – पुत्रिकापुत्रः
भर्ता – पतिः
जामाता – पुत्र्याः पतिः
देवरः – भर्तुः भ्राता
श्वशुरः – भर्तुः भार्यायाः वा जनकः
श्यालः – भार्यायाः भ्राता
मातुलानी – मातुलभार्या

माता – जननी
मातुलः – मातुः भ्राता
मातृष्वसा – मातुः भगिनी
मातृष्वसेयः – मातृभगिन्याः पुत्रः
मातामहः – मातुः पिता
मातामही – मातुः माता
प्रपितामही – पितामहस्य माता
भगिनी – सहोदरी
पुत्री – सुता
पौत्री – पुत्रस्य पुत्री
दौहित्री – पुत्रिकापुत्री
भार्या – पत्नी
स्नुषा – पुत्रस्य भार्या
ननान्दा – भर्तुः भगिनी
श्वश्रूः – भर्तुः भार्यायाः वा माता
याता – पतिसहोदरस्य भार्या
प्रजावती – भ्रातुः भार्या

CC-0. In Public Domain. Cuddalore Collection. TN.